"न स्वामिना निसृष्टोऽपि शूद्रो दास्याद्विमुच्यते ।
निसर्गजं हि तत्तस्य कस्तस्मात्तदपोहति ॥" )
मध्यस्थम् । इति त्रिकाण्डशेषः ॥

निसृष्टार्थः, पुं, ( निसृष्टो न्यस्तोऽर्थः प्रयोजनं यस्मिन्निति ।) दूतविशेषः । यथा,—
"निसृष्टार्थो मितार्थश्च तथा सन्देशहारकः ।
कार्य्यप्रेष्यस्त्रिधा दूतो दूत्यश्चापि तथा त्रिधा ॥"
तल्लक्षणं यथा,—
"उभयोर्भावमुन्नीय स्वयं वदति चोत्तरम् ।
सुश्लिष्टं कुरुते कार्य्यं निसृष्टार्थस्तु स स्मृतः ॥"
इति साहित्यदर्पणे ३ परिच्छेदः ॥
धनायव्ययपालनादौ नियुक्तः । यथा वृहस्पतिः ।
"यः स्वामिना नियुक्तोऽपि धनायव्ययपालने ।
कुसीदकृषिवाणिज्ये निसृष्टार्थस्तु स स्मृतः ॥"
इति व्यवहारतत्त्वम् ॥
पुरुषविशेषः । तस्य लक्षणं यथा,—
"धीरः स्थिरमतिः शूरः स्वामिकार्य्यविधायकः ।
श्रमौषधप्रकाशी च निसृष्टार्थः स उच्यते ॥"
इति सङ्गीतदामोदरः ॥

निस्तनी, स्त्री, ( नितरां स्तनवदाकारोऽस्त्यस्या इति । अच् । गौरादित्वात् ङीष् ।) वटिका । इति शब्दचन्द्रिका ॥ बड़ि इति भाषा ॥ ( निर्गतौ स्तनौ यस्या इति । ) स्तनहीना च ॥

निस्तरणं, क्ली, (निस्तीर्य्यतेऽनेनेति । निर् + तॄ + करणे ल्युट् । ) उपायः । निस्तारः । तरणम् । इति मेदिनी । णे, ६६ ॥ निर्गमः । इति विश्वः ॥

निस्तर्हणं, क्ली, ( निर् + तृह् हिंसायाम् + भावे ल्युट् ।) मारणम् । इत्यमरः । २ । ८ । ११४ ॥

निस्तलं, त्रि, ( निरस्तं तलं स्वरूपमस्येति । ) वर्त्तुलम् । इत्यमरः । ३ । १ । ६८ ॥ ( यथा, कुमारसम्भवे । १ । ४२ ।
"कण्ठस्य तस्याः स्तनबन्धुरस्य
मुक्ताकलापस्य च निस्तलस्य ॥")
चलम् । इति मेदिनी । ले, १०३ ॥ ( नितरां तलम् ।) तलम् । इति हेमचन्द्रः ॥

निस्तारः, पुं, ( निर् + तॄ + घञ् । ) निस्तरणम् । उद्धारः । ( यथा, शृङ्गारशतके । ७१ ।
"संसार तव निस्तारपदवी न दवीयसी ।
अन्तरा दुस्तरा न स्युर्यदि रे मदिरेक्षणाः ॥")

निस्तारबीजं, क्ली, ( निस्तारस्य संसारसमुद्रोत्तरणस्य बीजम् । ) संसारतरणकारणम् । तद्यथा,—
"स्मरणं कीर्त्तनं विष्णोरर्च्चनं पादसेवनम् ।
वन्दनं स्तवनं नित्यं भक्त्या नैवेद्यभक्षणम् ॥
चरणोदकपानञ्च तन्मन्त्रजपनं तथा ।
इदं निस्तारबीजञ्च सर्व्वेषामीप्सितं भवेत् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३३ अध्यायः ॥
( अपि च । महानिर्व्वाणतन्त्रे ।
"कलौ पापयुगे घोरे तपोहीनेऽति दुस्तरे ।
निस्तारबीजमेतावद्ब्रह्ममन्त्रस्य साधनम् ॥
साधनानि बहूक्तानि नानातन्त्रागमादिषु ।
कलौ दुर्व्वलजीवानामसाध्यानि महेश्वरि ! ॥"
उद्धारकारणमात्रम् । यथा,—
"जीर्णा तरिः सरिदतीवगभीरनीरा
बाला वयं सकलमित्थमनर्थहेतुः ।
निस्तारबीजमिदमेव कृशोदरीणां
यन्माधव त्वमसि सम्प्रति कर्णधारः ॥"
इत्युद्भटः ॥)

निस्तितीर्षु, त्रि, ( निर् + तॄ + सन् + उः । ) निस्तरितुमिच्छुः । यथा,—
"ततः सन्दर्शितो धात्रा दुस्तरं निस्तितीर्षताम् ॥"
इति श्रीभागवते । १ । १ । २२ ॥

निस्तुषक्षीरः, पुं, (निस्तुषं परिष्कृतं क्षीरं यस्येति ।) गोधूमः । इति राजनिर्घण्टः ॥

निस्तुषरत्नं, क्ली, ( निस्तुषं निर्म्मलं रत्नम् । ) स्फटिकः । इति राजनिर्घण्टः ॥

निस्तुषितं, त्रि, ( निस्तुष + इतौ णिच् + क्तः । ) त्वग्विहीनम् । त्यक्तम् । लघूकृतम् । इति मेदिनी । ते, २०२ ॥

निस्तेजाः, [स्] त्रि, (निर्गतं तेजो यस्मादिति । ) तेजोरहितः । यथा,—
"इदं कवचमज्ञात्वा कवचाद्यं पठेत्तु यः ।
सर्व्वं तस्य वृथा देवि ! निस्तेजो न च सिद्धिदम् ॥"
इति ब्रह्मयामलीयगायत्रीकवचधृतम् ॥
(यथा च देवीभागवते । २ । ८ । ११ ।
"अन्धपत्न्यस्तदा मार्गे चौराभीरैश्च लुण्ठिताः ।
धनं सर्व्वं गृहीतञ्च निस्तेजाश्चार्ज्जुनोऽभवत् ॥")

निस्त्रिंशः, पुं, ( निर्गतस्त्रिंशतोऽङ्गुलिभ्य इति । निरादय इति समासः । "संख्याया स्ततुपुरुषस्य डच्वाच्यः ।" ५।४।१२३ । इत्यस्य वार्त्तिकोक्त्या डच् । ) खड्गः । इत्यमरः । २ । ८ । ८९ ॥ ( यथा, महाभारते । ४ । ४१ । २४ ।
"नकुलस्यैव निस्त्रिंशो गुरुभारसहो दृढः ॥")
निर्दये, त्रि । इति मेदिनी । शे, २१ ॥ (यथा, अमरुशतके । ५ ।
"दत्तोऽस्याः प्रणयस्त्वयैव भवता चेयं चिरं लालिता
दैवादद्य किल त्वमेव कृतवानस्या नवं विप्रियम् ।
मन्युर्दुःसह एष यात्युपशमं नो सान्त्ववादैः स्फुटम् ।
हे निस्त्रिंश ! विमुक्तकण्ठकरुणं तावत् सखी रोदितु ॥" )
त्रिंशत्शून्यः । इति व्याकरणम् ॥

निस्त्रिंशधारी, [न्] त्रि, ( निस्त्रिंशं धरतीति । निस्त्रिंश + धृ + णिनि । ) खड्गधारी । तल्लक्षणं यथा, मात्स्ये १८९ अध्यायः ।
"सुरूपस्तरुणः प्रांशुर्दृढभक्तिः कुलोचितः ।
शूरः क्लेशसहश्चैव खड्गधारी प्रकीर्त्तितः ॥"

निस्त्रिंशपत्त्रिका, स्त्री, (निस्त्रिंशः खड्ग इव पत्त्रमस्या अस्तीति । ठन् । ) स्नुहीवृक्षः । इति राजनिर्घण्टः ॥

निस्त्रैंशपुष्पिकः, पुं, दग्धधत्तूरकः । इति राजनिर्घण्टः ॥

निस्नेहफला, स्त्री, ( निःस्नेहं तैलविहीनं फलं यस्याः । ) श्वेतकण्टकारी । इति राजनिर्घण्टः ॥

निस्पन्दः, पुं, ( नि + स्पन्द + भावे घञ् । ) स्पन्दनम् । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १२ । ३३५ । ६ ।
"मेरोः सहस्रैः स हि योजनानां
द्वात्रिंशतोर्द्ध्वं कविभिर्निरुक्तः ।
अनिन्द्रियाश्चानशनाश्च तत्र
निस्पन्दहीनाः सुसुगन्धिनस्ते ॥" )

निस्पन्दः, त्रि, (निर्गतः स्पन्दश्चलनकादिस्पन्दनं यस्मात् ।) स्पन्दरहितः । ईषत्कम्पशून्यः । यथा,
"कावेरीतीरभूमीरुहरुजगवधूसक्तसङ्क्रान्तयिष्टः
कार्णाटीचीनचीनस्तनवसनदशान्दोलनिस्पन्दमन्दः ॥"
इति विक्रमादित्यराजसभायां र। दृषपद्यम् ॥

निस्पन्दतरं, त्रि, ( निस्पन्द + तरप् । ) एकान्तस्पन्दरहितम् । यथा, नैषधे । ८ । १२ ।
"कश्चिद्धने नैषधकेशपाशे
निपत्य निस्पन्दतरी भवन्त्याम् ।
तस्याशुबन्धं न विमोच्य गन्तुमपारि तल्लोचनखञ्जनाभ्याम् ॥"

निस्पृहः, त्रि, (निर्गता स्पृहा इष्टानिष्टविषयवासना यस्येति । ) स्पृहाशून्यः । यथा,—
"निस्पृहः सर्व्वकामेभ्यो युक्त इत्युच्यते तदा ॥"
इति श्रीभगवद्गीतायाम् । ६ । १८ ॥

निस्पृहा, स्त्री, अग्निशिखावृक्षः । यथा,—
"अनला निस्पृहा चापि मालिनी विष्णुवल्लभा ॥"
इति शब्दचन्द्रिका ॥
स्पृहाया अभावश्च । ( अव्ययीभावः । )

निस्य(ष्य)न्दः, पुं, ( नि + स्यन्द् ह स्रवणे + भावे घञ् । "अनुविपर्य्यभिनिभ्यः स्यन्दतेरप्राणिषु ।" ८ । ३ । ७२ । इति वा षत्वम् । ) स्यन्दनम् । क्षरणम् । यथा,—
"माकन्दरसनिस्यन्दसुन्दरोद्गारकारिणी ।
अयमानन्दिमाधवौ बन्दिनाविव राजतः ॥"
इति प्रसन्नराघवनाटके पक्षधरमिश्रः ॥
( यथा च रामायणे । २ । ६४ । १२ ।
"जलप्रपातैरुद्रेकैर्निष्यन्दैश्च क्वचित् क्वचित् ।
स्रवद्भिर्भात्ययं शैलः स्रवन्मद इव द्विपः ॥"
निस्यन्दते इति कर्त्तरि अच् । क्षरणशीले, त्रि । यथा, रघुः । २ । ४१ ।
"तदङ्गनिस्यन्दजलेन लोचने
प्रमृज्य पुण्येन पुरस्कृतः सताम् ।
अतीन्द्रियेष्वप्युपपन्नदर्शनो
बभूव भावेषु दिलीपनन्दनः ॥")

निस्रावः, पुं, ( निःस्राव्यते इति । नि + स्रु + णिच् + घञ् । ) भक्तसमुद्भवमण्डम् । फेन इति माड़ इति च भाषा । तत्पर्य्यायः । मासरः २ आचामः ३ । इत्यमरः ।२।९।४९॥ (नि + स्रु + घञ् । द्रवः । यथा, हरिवंशे । ६६ । ९ ।
"धातुनिस्रावदिग्धाङ्गं सानुप्रस्रवभूषितम् ॥" )